प्रारम्भाब्दः १९६४ ई.तः

ISSN 2348-9847

# सुरभारती

वर्षम् - ५२

अङ्कः ५२

## (शताब्दी विशेषाङ्कः)

वार्षिकी शोधपत्रिका २०१५ -१६



सत्यं शिवं सुन्दरम्

पारम्परिकसंस्कृताध्ययनविभागः

बरोडासंस्कृतमहाविद्यालयः

महाराजसयाजीरावविश्वविद्यालयःवटोदरम्

Scanned with CamScanner

ISSN 2348-9847

# सत्यव्रतशास्त्रिप्रणीते श्रीरामकीर्तिमहाकाव्ये विशेषच्छन्दोवलोकनम्

डॉ. ललित पटेल

ज्ञानपीठपुरस्कारविभूषितेन भारतीयविद्याक्षेत्रख्यातेन कविवरेण प्रोफेसर सत्यव्रशास्त्रिणा थाईदेशे 'रामकीयन्' इति ख्यातिमवाप्ता रामायणकथामेवुपजीप्यत्वेनाङ्गीकृत्य नवनवोन्मेष-शालिन्या प्रतिभया विरचितं सुख्यातं च वर्तते रामकीर्तिनाम्ना महाकाव्यम् ।[१] उक्तञ्च शास्त्रिणा-

**तस्यैवाखिलजनवन्दितस्य दिव्यं चारित्रं विशदमुपास्य रामभक्ताः ।**

**गायन्ति स्वरचितकाव्यमाध्यमेन तत्काव्यं प्रसरति रामकीर्तिनाम्ना ॥[२]**

साहित्यरससुधां प्रवाह्यन्ती वितरन्ती चेयं पद्यमयी काव्यधारा पञ्चविंशतिसर्गैः (२५), नवोत्तरद्वादशशतंश्लोकैः (१२०९), पञ्चदशवृत्तैश्च (१५) सुनिबद्धा । महाकाव्यमेतत् गुरूपूर्णिमायाः पावने पर्वणि एकोननवत्युत्तरैकोनविंशतितमे इस्वीयसंवत्सरे जुलाईमासे अष्टादशदिनाङ्के समाप्तिमगात् ।[३] श्रीरामकीर्तिमहाकाव्ये सुप्रयुक्तानि वृत्तानि (१) अनुष्टुप् (२) इन्द्रवज्रा (३) उपजातिः (४) तोटकम् (५) द्रुतविलम्बितम् (६) पुष्पिताग्रा (७) प्रहर्षिणी (८) भुजङ्गप्रयातम् (९)मन्दाक्रान्ता (१०) मालिनी (११) वसन्ततिलका (१२) विद्युन्माला (१३) वियोगिनी (१४)स्वागता (१५) शिखरिणी च । इत्येतेषां छन्दसां विशेषावलोकनमत्र स्थालीपुलकन्यायेन विधीयते ।

सर्ववर्णनागुणं श्रीरामकीर्तिमहाकाव्ये निरूपितानां वृत्तानां श्लोकसंख्यया सह तालिका -



Scanned with CamScanner

# सुरभारती

| सर्गः | वर्णनम् | श्लोक संख्या | वृत्तम् | सर्गान्ते वृतम् |
|---|---|---|---|---|
| १. | उपोद्धातः | ३९ | इन्द्रवज्रा उपजातिश्च | इन्द्रवज्रा उपजातिश्च |
| २. | अनोमतन्नुपस्थानम् | १९ | अनुष्टुप् इन्द्रवज्रा उपजातिश्च | प्रहर्षिणी |
| ३. | श्रीरामजजन्मोपाख्यानम् | २४ | अनुष्टुप् इन्द्रवज्रा | |
| ४. | नन्दकोपाख्यानम् रावणस्यपूर्वजन्मवृतान्तश्च | ६५ | इन्द्रवज्रा उपजातिश्च | अनुष्टुप |
| | सीताजन्मोपाख्यानम् सीताविवाहोपाख्यानम्रामसुरो पारव्या नम्। | | अनुष्टुप् इन्द्रवज्रा उपनजातिश्च | |
| ५. | रामवनवासोपाख्यानम् जिह्लोपाख्यानम् | | इन्द्रवज्रा उपजातिश्च | वद्युन्माला |
| ६. | सीताहरणोपाख्यानम् जटायुवधोपाख्या नम् | ४० | इन्द्रवज्रा उपजातिश्च | पुष्पिताग्रा |
| ७. | हनुमत्सम्पर्कोपाख्यानम् | १९ | उपजातव्रजातिश्च | स्वागता |
| ८. | दरभ्यु (थोरणुं) पाख्यानम् वालिबधोपाख्यानम् | ३६ | इन्द्रवज्रा उपजातिः | द्रुतविलम्बितम् |
| ९. | रावणस्वप्नोपायानम् रामशिबिरे गुप्तचरस सम्प्रेषणो पाख्यानम् | ५४ | मन्द्राक्रान्ता इन्द्रवज्रा उपजातिश्च | मालनी |
| १०. | बेङ्गकण्युपाराधानम् | ३४ | इन्द्रवज्रा उपजातिं तोटकम् | मालिनी च उपजातिः |
| ११. | नीलहनुमद्विग्रहोपाख्यानम् | २४ | भुजङ्गप्रयातम् उपजातिं अनुष्टुप | च उपजातिः |
| १२. | सुवर्णमत्स्थोपाख्यानम् | ५५ | अनुष्टुप् वसन्ततिलका | अनुष्टुप् |
| १३. | मैयरबोपाख्यानम् | ६५ | इन्द्रवज्रा उपजातिश्च | अनुष्टुप् |
| १४. | मैयराबोपाख्यानं पूर्वानुवृत्तम् | ७६ | इन्द्रवज्रा उपजातिः अनुष्टुप् च। | स्वागता |
| १५. | कुम्भकर्णवधोपाख्यानम् | ९९ | अनुष्टुप् इन्द्रवज्रा उपजातिश्च | स्वागता |
| १६. | मलिवग्गब्रह्मोपाख्यानम् | २७ | अनुष्टुप् इन्द्रवज्रा उपजातिश्च | अनुष्टुप् |
| १७. | रावणात्मोपाख्यानम् | ६४ | सवागता अनुष्टुप् | |
| १८. | महिपालदेवासुरोपाख्यानम् | ३४ | इन्द्रवज्रा उपजातिश्च | अनुष्टुप् |
| १९. | लङ्कोपद्रवोपाख्यानम् | ५३ | इन्द्रवज्रा उपजातिश्च | वसन्ततिलका |
| २०. | सीतानिर्वासनोपाख्यानम् | ८३ | शिखरिणी वियोगिनी च | उपजातीः |
| २१. | लवजन्मोपाख्यानम् | ५६ | इन्द्रवज्रा उपजातिश्च | अनुष्टुप् |
| २२. | लवमङ्कुटरामसमागमो-पाख्यानम् | ९१ | अनुष्टुप् उपजातिः | |
| २३. | सीतापातालप्रवेशोपास्थानम् | ४६ | इन्द्रवज्रा उपजातिश्च | अनुष्टुप् |
| २४. | सीतापातालप्रवेशोपाख्यानं पूर्वानुवृत्तम् | ४८ | इन्द्रवज्रा उपजातिश्च | अनुष्टुप् |
| २५. | सीतारामसमगमोपाख्यानम् | ३१ | इन्द्रवज्रा उपजातिः स्वागता | प्रहर्षिणी |

Scanned with CamScanner

१. **इन्द्रवज्रा-** 'इन्द्रवज्रा तौ जगौ ग् ॥'[४] तदेव अन्यत्रापि प्रोक्तम्- 'स्यान्द्रिवज्रा यदि तौ जगौ गः ।' उक्तैकादशाक्षरप्रस्तारस्य सप्तपञ्चाशदधिकत्रिशततमोऽयं (३५७) भेदः 'इन्द्रवज्रा' इति प्रसिद्धः प्राकृते । त्रिष्टुप्पादघटकीभूतानायकादशाक्षराणां पुस्तारे भेदोऽयम् । अस्मिन् महाकाव्ये प्रायः (१९) नवदशसर्गेषु इन्द्रवज्रावृत्तस्य प्रयोगत्यव्रतशास्त्रिणा कृतमस्ति । उदाहरणम् –

**अस्त्ये शियानामनि सुप्रसिद्धे द्वीपे विशालेऽतिविशालकीर्तिः ।**

**आग्नेयदिङ् नण्डलमौलिभूतो देशोऽतिरम्यो भुवि थाईलैण्डः ॥१.१**

अस्त्येशियानामनि सुप्रसिद्धे

२. **उपजातिः** –'इन्द्रवज्रा नौ जगौ गू ।'तथा उपेन्द्रव्रज् जतौ ज्गौ ग् ॥ आद्यन्तावुपजातयः ॥[५] इति सूत्रानुसारम् इन्द्रवज्रयोः परस्परं समानाक्षरैः सह मिश्रणेन उपजातिवृत्तम । उक्तं च लक्षणम् –

**यत्र द्वयोरप्यनयोऽस्तु पादा भवन्ति सद्वृत्ततयाऽतिकान्त ।**

**विद्वद्भिराद्यैः परिकीर्तिता सा प्रयुष्यतामित्युपजातिरेषा ॥**

उदाहरणम् -

**आदेशमेतं प्रभुणा विसृष्टं निशम्य नीलः प्रययौ पुरं स्वम् ।**

**व्यापारयामास च वायुपुत्रः सर्वात्मना सेतुबन्धने स्वम् ॥११.२४**

३. **अनुष्टुप्** - लक्षणम् -

**श्लोके षष्ठं गुरु ज्ञेयं सर्वत्र लघु पञ्चमम् ।**

**द्विचतुष्पादयोर्हस्वं सप्तमं दीर्घमन्ययोः ॥**

उहारणम् -

**जायते पुररूपेण यदि नारायणः स्वयम् ।**

**राज्ञो दशरथस्य स्यात् रक्षाऽस्य निश्चितम् ॥३.६**

४. **तोटकम्** - तोटकं सः ॥६।६१॥[६] द्वादशाक्षरप्रस्तारस्य सप्तशतषट्पञ्चाशदधिकैकसहस्रतमो (१७५६) भेदः 'तोटक' इति नाम्ना प्रसिद्धः ।[७] उक्तं च लक्षणम्-वद तोटकमब्धिसकारयुतम् । यथा

**अथ रामवचो हृदये निदधत् कपिराशु स वेङ्कयीमनयत् ।**

**पथि यानपरश्च बभूव दृढं कुसुमेषु शरैरसनै प्रहृतः ॥१०.२४**

५. **द्रुतविलम्बितम्** –द्रुतविलम्बितं न्भौ भ्रौ ॥[८] अर्थात् यस्य पादे नगणभगणौ भगणरगणौ च भवतस्तदृतं द्रुतविलम्बितम् । तस्य लक्षणम्-'द्रुतविलम्बितर्माह नभौ भरौ ।' यथा-



Scanned with CamScanner

तदनु दाशरथिं समुपेयिवान् सकलवृत्तमुवाच कपिर्बुधः ।
स च सहायवृत्तौऽभवदुधतो दशमुखक्रमणाय विवेकवान् ॥८.३६

६. **पुष्पिताग्रा** – पुष्पिताग्रा नौ र्यौ, न्जौ ज्रौ ग् ।[९] अर्थात् प्रथमे पादे नकारौ रेफयकारौ च, द्वितीये नकारजकारौ जकाररेफौ गकारश्च, तद्वृत्तं पुष्पिताग्रा । उक्तं च – "अयुजि नयुगरेफतो यकारो, युजि च नजौ जरगाश्च पुष्पिताग्रा ।" तत्रोदाहरणम्-

**कथमपि जनकात्मजाविहिनः समयमयापयदात्मनि प्रलीनः ।**
**अविरतगमनाच्छ्रम प्रपन्नो दशरथवंशधरो भृशं विपन्नः ॥८.४**

७. **प्रहर्षिणी**- प्रहर्षिणी म्नौ जरौ ग् त्रिकदशकौ ॥[१०] अर्थात् यस्य पादे मगण्डनगणौ, जडाणरगणगकाराश्च भवन्ति तद्वृत्तं 'प्रहर्षिणी' नाम । उक्तं च-त्र्याशाभिर्मनजरगाः प्रहर्षिणीयम् । तत्रोदाहरणन् -

**तस्यैवाखिलजनबन्दितस्य दिव्यं चारित्रं विशदमुपास्य रामभक्ताः ।**
**गायन्ति स्वचितकाव्यमाध्यमेन तत्काव्यं प्रसरति रामकीर्तिनाम्ना ॥२.१९**

८. **भुजङ्गप्रयातम्**- भुजङ्गप्रयातं यः ॥[११] अर्थात् यस्य पादे चत्वारो यगणाः भवन्न्, तद्वृत्तं 'भजङ्गप्रयातं' नाम । उक्तं च- "भुजङ्गप्रयातं चतुर्भिर्यकारैः ।" तत्रोदाहरणम् –

**समुद्रस्य मध्ये स्थिता रावणस्य पुरी नाम लङ्का बभौ राजधानी ।**
**समृद्धेः परं पारमाप्ता सुगुप्ता त्रिलोक्यां प्रसिद्धिं परमाससाद ॥११.१**

९. **मन्दाक्रान्ता** –मन्दाक्रान्ता म्भौ नतौ त्गौ ग् समुद्रर्तुस्वराः ॥[१२] अर्थात् यस्य पादे मगणभगणनगणाः तगणौ, गकारौ, तद्वृत्तं 'मन्दाक्रान्ता' नाम । चतुर्षु षट्सु सप्तसु च यतिः । तत्रोदाहरणम् –

**लङ्कां यद्यप्यदहदखिलां, वायुपुत्रस्तरस्वी नैतच्चिन्तामणुमपि मनस्यातनोद् गर्वितस्य ।**
**पौलस्तस्य प्रथितयशसो लोकलोकैकजेतुर्धीरा आपद्यति निपतिता नैव मुञ्चन्ति धैर्यम् ॥९.१**

१०. **मालिनी**- मालिनी नौ म्यौ य् ॥[१३] अर्थात् यस्य पादे नगणौ, मगणयगणौ, यगणश्च भवति, तद्वृत्तं 'मालिनी' नाम । पूर्वैव यतिः । उक्तं च- 'ननमयययुतेयं' मालिनी भोगिलोकैः। तत्रोदाहरणम्

**यदि भवति विषादस्योदया रामचित्ते न हि कथमपि शक्तः स्यादयं सङ्गराय ।**
**इति धियमभिपन्नस्तत्परावर्तनार्थं दशमुख इह गूढां युक्तिमेकां प्रयन्नः ॥९.५४**



Scanned with CamScanner

**११. वसन्ततिलका**– वसन्तिलका त्भौ जौ गौ ।।[१४] अर्थात् यस्य पादे तगणभगणौ जगणौ गकारौ च तद्वृतं 'वसन्ततिलका' नाम । उक्तं च–"ज्ञेयं वसन्ततिलकं तभजा जगौ गः ।" तत्रोदाहरणम् –

**धीरं विलोकयति वस्फुटमन्दहासा वाचं न मित्रयति वानरवीरवाचा ।**

**आविष्करोति दृढभूमिमुपयिवांसं निःश्वासवायुमिषतः स्मरदाहमेषा ।।१२.४६**

**१२. वियोगिनी (सुनदरी)** –इदं वृत्तं मद्रकस्य भेदरूपम् । 'अयुजोर्यरि सौ जगौ यजाः सभरा लौ यदि सुन्दरी तदा ।।' अर्थात् यस्य प्रथमे तृतीये च पादे सगणौ, जगणः गकारः, भवन्ति तथा तृतीये चतुर्थे च सगणः भगणः, रगणः लकारः गकारश्च भवन्ति तद्वृतं 'वियोगिनी' नाम । तत्रोदाहरणम्–

**सखिभावमुपागतस्य मे नियतं सेवनवृत्तिकस्य च ।**

**मम भृत्यजनस्य गीर्ध्रुवं परिपाल्याऽस्ति मयेति भावतः ।।२०.१७**

**१३. विद्युन्माला**–विद्युन्माला मौ गौ ।[१५] अर्थात् यस्य पादे मकारौ गकारौ च तद्वृतं 'विद्युन्माला' नाम । तत्रोदाहरणम् –

**अशानेनान्याय्यं भूयो लोकः कुर्यात् कृत्यं लोके ।**

**पश्चात्तो येनास्य स्यात् दुःखं चित्ते प्रादुःष्याच्च ।।५.२७**

**१४. स्वागता**– स्वागता र्नौ भ्गौ ग् ।।[१६] यस्य पादे रगणनगणौ भगणो, गकारौ च तद्वृत्तं 'स्वागता' नाम । तत्रोदाहरणम्–

**तेन हर्षममितं प्रतिपन्नो राघवस्य चरणावुपसन्नः ।**

**चेतसा स दनुजो न विषण्णः स्वर्गलोकमभवत् प्रतिपन्नः ।।१५.९९**

**१५. शिखरिणी**– शिखरिणी यमौ न्सौ भुलौ गृतुरुद्राः ।।[१७] यस्य पादे यगण–मगण–नगण–सगण–सगण–भगण–लकार–गकारश्च भवन्ति तद्वृत्तं 'शिखरिणी' नाम । उक्तं च –

**रसै रूद्रैश्छिन्ना यमनसभलागः शिखरिणी ।**

तत्रोदाहरणम् –

वनेष भ्रान्तवाऽपि प्रथममतिकष्टेषु गहनेषष्वयोध्यायां सम्प्रत्यतिमहितपुर्यामधिगता ।

पदं सीता राज्ञया इह जगति वीताखिलभया विनिन्ये सुप्रीता निजसमयमत्यन्तसुखिता ।।२०.४



Scanned with CamScanner

॥ सन्दर्भा :॥

१. तथ्यमिदं मुखपृष्ठ एव उल्लिखितम् - "Through the work, the Rama story of Thailand opens it self to large numbers of lovers of sanskrit throughout the world and at once becomes a part of the vast sanskrit literature with a history of thousands of years. The Sriramakirtimahakavyam is the first ever sanskrit Mahakavya on any of the versions of the Rama dtory of south As" रामकीर्तिमहाकाव्यम्- Preface page XVII.

२. श्रीरामकीर्तिमहाकाव्यम्, २.१९, ईस्टर्न बुक लिंकर्स द्वारा प्रकाशितम्।

३. तत्रैव

४. पिङ्गलाचार्यप्रणीतं छन्दःशास्त्रम्, ६/१५, पृ.-११६ परिमलपब्लिकेशन्स, दिल्ली

५. तत्रैव, ६/१६-१७

६. तत्रैव, पृ.-१३८

७. तत्रैव, पृ.-१३९

८. तत्रैव, ६/३०, पृ.-१३८

९. तत्रैव, ५/४१, पृ.-९७

१०. तत्रैव, ७/१, पृ.-१४६

११. तत्रैव, ६/३७, पृ.-१४१

१२. तत्रैव, ७/१९, पृ.-१५९

१३. तत्रैव, ७/१४, पृ.-१५४

१४. तत्रैव, ७/८, पृ.-१५०

१५. तत्रैव, ६/६, पृ.-१०९

१६. तत्रैव, ७/२०, पृ.-१५९

१७. तत्रैव, ६/२३, पृ.-१३४



Scanned with CamScanner